|| ચતુર્થોઽધ્યાયઃ ||

વિષ્ણુર્બ્રહ્મ તથા દાતેત્યેવં નિત્યમુપાસનમ |
કાર્યમાપદ્યપિ બ્રહ્મ તેન યાત્યપરોક્ષતામ || ૧ ||

પ્રારબ્ધકર્મણોઽન્યસ્ય જ્ઞાનાદેવ પરિક્ષયઃ |
અનિષ્ટસ્યોભયસ્યાપિ સર્વસ્યાન્યસ્ય ભોગતઃ || ૨ ||

ઉત્તરેષૂત્તરેષ્વેવં યાવદ્વાયું વિમુક્તિગાઃ |
પ્રવિશ્ય ભુંજતે ભોગાંસ્તદંતર્બહિરેવ વા || ૩ ||

વાયુર્વિષ્ણું પ્રવિશ્યૈવ ભોગશ્ચૈવોત્તરોત્તરમ |
ઉત્ક્રમ્ય માનુષા મુક્તિં યાંતિ દેહક્ષયાત સુરાઃ || ૪ ||

અર્ચિરાદિપથા વાયું પ્રાપ્ય તેન જનાર્દનમ |
યાંત્યુત્તમા નરોચ્ચાદ્યા બ્રહ્મલોકાત સહામુના || ૫ ||

યથાસંકલ્પભોગાશ્ચ ચિદાનંદશરીરિણઃ |
જગત્સૃષ્ટ્યાદિવિષયે મહાસામર્થ્યમપ્યૃતે || ૬ ||

યથેષ્ટશક્તિમંતશ્ચ વિના સ્વાભાવિકોત્તમાન |
અનન્યવશગાશ્ચૈવ વૃદ્ધિહ્રાસવિવિર્જિતાઃ |
દુઃખાદિરહિતા નિત્યં મોદંતેઽવિરતં સુખમ || ૭ ||

પૂર્ણપ્રજ્ઞેન મુનિના સર્વશાસ્ત્રાર્થસંગ્રહઃ |
કૃતોઽયં પ્રીયતાં તેન પરમાત્મા રમાપતિઃ || ૮ ||

નમો નમોઽશેષદોષદૂરપૂર્ણગુણાત્મને |
વિરિંચિશર્વપૂર્વેડ્યવંદ્યાય શ્રીવરાય તે || ૯ ||

|| ઇતિ શ્રીમદાનંદતીર્થભગવત્પાદાચાર્યવિરચિત બ્રહ્મસૂત્રાણુભાષ્યે ચતુર્થોઽધ્યાયઃ ||

|| ઇતિ શ્રીમદણુભાષ્યમ ||

www.yousigma.com